# शैक्षणिक पर्याययोजना

## षष्ठीकक्ष्या – 2021–22

## संस्कृततृतीयभाषा

रचनासमितिः

1) श्री नारायणमूर्तिः, विवेक बालिका प्रौढशाला, कोट, उडुपि मण्डलम्
2) रामचन्द्र भट्टः, सर्वकारीय बालिका प्रौढशाला, उडुपि नगरम् –576101

# शैक्षणिकपर्याययोजना

## शैक्षणिकवर्षः 2021–22 –अक्टोबर् मासः

**कक्ष्या – षष्ठी** **विषयः– तृतीयभाषा संस्कृतम्**

| क्र सं | मासाः/सप्ताहः | अधिगमफलानि | निर्देशात्मक–क्रियाकलापः | मौल्यमापनम् |
|---|---|---|---|---|
| 1 | **अक्टोबर् मासः प्रथमसप्ताहः** क्रियाकलापः –1 | एकादशः पाठः – स्तोत्राणि – द्वौ श्लोकौ | 1.अध्यापकः स्तोत्राणि स्पष्टतया पठति। छात्राः तत् श्रुत्वा अनुवाचनं कुर्वन्ति। अध्यापकः श्लोकस्य तात्पर्यार्थं विवृणोति। गणपति–गुरु विषयक–विशेषणस्य स्फोरकपत्राणि प्रदर्शयति, छात्राः अर्थं जानन्ति। | अध्यापकः गणपतेः गुरोश्च चित्रं प्रदर्शयति, छात्राः तद्विषयक– स्तोत्रस्य कण्ठपाठं वदन्ति। |
| 2. | क्रियाकलापः –2 | एकादशः पाठः – स्तोत्राणि – अन्तिमौ द्वौ श्लोकौ | 1.अध्यापकः स्तोत्राणि स्पष्टतया पठति। छात्राः तत् श्रुत्वा अनुवाचनं कुर्वन्ति। अध्यापकः श्लोकस्य तात्पर्यार्थं विवृणोति। अध्यापकः सूर्यस्य रामस्य च चित्राणि प्रदर्शयति। छात्राः तद्विषयक–विशेषणानि स्मृत्वा एकैकशः वदन्ति। | कण्ठपाठ–स्पर्धा–द्वारा मौल्यमापनम् |
| 3 | क्रियाकलापः –3 | पाठान्ते विद्यमान–अभ्यास – प्रश्नोत्तराणि | अध्यापकः मार्गदर्शनं करोति, छात्राः उत्तराणि लिखन्ति। | अध्यापकः अभ्यास–सम्बन्धी–मौखिकप्रश्नान् पृच्छति, छात्राः उत्तराणि यच्छन्ति। |

अभ्यासपत्रिका –1

**एकवाक्येन उत्तरयत**

1) सुरज्येष्टः कः?
2) विष्णुस्वरूपः ..........।
3) सूर्यस्य वर्णं लिखत।
4) रामस्य पत्नी का?
5) सुखम् इत्यस्य विरुद्धार्थकपदं किम्?
6) नास्ति इत्यत्र संयुक्ताक्षरपदं चिनुत।

| क्र सं | मासाः/सप्ताहः | अधिगमफलानि | निर्देशात्मक–क्रियाकलापः | मौल्यमापनम् |
|---|---|---|---|---|
| 1 | **<u>अक्टोबर् मासः</u>**<br>**<u>द्वितीयसप्ताहः</u>** | **(दसरा–विरामकाले)**<br>सुबन्त पदानां, क्रियापदानां स्तोत्राणां च पुनः स्मारणम् | सुबन्त पदानां, क्रियापदानां स्तोत्राणां च पुनः स्मारणम्, पठन–लेखनद्वारा पुनरावृत्तिः, | अध्यापकः गृहकार्यं परिशीलयति, मार्गदर्शनं करोति। |

| क्र सं | मासाः/सप्ताहः | अधिगमफलानि | निर्देशात्मक–क्रियाकलापः | मौल्यमापनम् |
|---|---|---|---|---|
| 1 | **<u>अक्टोबर् मासः</u>**<br>**<u>तृतीयसप्ताहः</u>**<br>क्रियाकलापः –1 | द्वादशः पाठः – शरीरस्य अङ्गानि – मुखावयवानि | अध्यापकः पाठं स्पष्टतया पठति। छात्राः तत् श्रुत्वा अनुवाचनं कुर्वन्ति। शिक्षकः स्वशरीरे एकैकस्य अङ्गस्य स्पर्शं कृत्वा शरीर–अवयवानां परिचयं करोति। | मानवचित्रमेकं दर्शयित्वा छात्रान् पृच्छति, छात्राः अङ्गानां नामानि वदन्ति। |
| 2. | क्रियाकलापः –2 | द्वादशः पाठः – शरीरस्य अङ्गानि –शरीरमध्यभागः | अध्यापकः पाठं स्पष्टतया पठति। छात्राः तत् श्रुत्वा अनुवाचनं कुर्वन्ति। शरीरावयवस्य नामानि वदति। छात्राः स्वशरीरे तत्सम्बद्ध–अङ्गानि स्पर्शयन्ति। | शिक्षकः छात्रेभ्यः अङ्गानां नामलेखन– स्पर्धां आयोजयति। |
| 3 | क्रियाकलापः –3 | पाठस्य पुनः स्मारणम् | अङ्गानां विषये एका क्रीडा –<br>(उदा : एकः छात्रः अङ्गकार्यं वदति अन्यः तदङ्गं स्वशरीरे दर्शयति) | शिक्षकः परिशीलयति |

अभ्यासपत्रिका –1

**एकवाक्येन उत्तरयत**

1) मनुष्यस्य प्रधानम् अङ्गं किम्?
2) हस्तौ ~ द्वौ :: अङ्गुल्यः ~ ............।
3) नासिकया ......... जिघ्रामः।
4) कण्ठः कुत्र अस्ति?
5) अङ्गुलीषु के सन्ति?
6) कः दुर्योधनस्य ऊरुभङ्गं कृतवान्?

| क्र सं | मासाः/सप्ताहः | अधिगमफलानि | निर्देशात्मक–क्रियाकलापः | मौल्यमापनम् |
|---|---|---|---|---|
| 1 | **अक्टोबर् मासः**<br>**चतुर्थः सप्ताहः**<br>क्रियाकलापः –1 | द्वादशः पाठः –शिशुगीतम् – | अध्यापकः पद्यं सुश्राव्यं गायति। छात्राः तत् श्रुत्वा अनुकुर्वन्ति। गुरुः अभिनयरूपेण गीतस्य अर्थं बोधयति। | छात्रैः अभिनयं कारयति। |
| 2. | क्रियाकलापः –2 | त्रयोदशः पाठः – परिवारः जन्मदिनस्य संभ्रमः | अध्यापकः पाठं स्पष्टतया पठति। छात्राः तत् श्रुत्वा अनुवाचनं कुर्वन्ति। गृहे के के सन्ति इति छात्राः वदन्ति। अध्यापकः तेषां संस्कृतनामानि वदति। | शिक्षकः छात्रेभ्यः गृहसदस्यानां नामलेखन– स्पर्धां आयोजयति। |
| 3 | क्रियाकलापः –3 | त्रयोदशः पाठः – परिवारः सम्बन्धसूचकशब्दाः | 1.अध्यापकः एकैकस्य पात्रं दत्वा तैः सम्भाषणं कारयति।<br>2. पाठान्ते विद्यमान–षष्ठी विभक्तेः परिचयं करोति, अभ्यासं कारयति च। | शिक्षकः परिशीलयति |

अभ्यासपत्रिका –1

**एकवाक्येन उत्तरयत**

1) कैः माला क्रियते?
2) देशहितार्थं ………..।
3) वयं कम् अर्चयाम?
4) अद्य कस्य जन्मदिनम्?
5) जन्मदिने कीदृशं स्नानं भवति?

अभ्यासपत्रिका अङ्काः –20

1) एकवाक्येन उत्तरयत 4*1=4

a) शिरसि के सन्ति?

b) महापापहरः कः?

c) अद्य कस्य जन्मदिनम्?

d) क्रीडनार्थं कुत्र गच्छाम?

2) रिक्तस्थानानि पूरयत 4*1=4

a) मम पितुः नाम …………।

b) ज्ञानवारिधौ ……………।

c) …….जन्मदिनं सन्तोषेण आचरन्ति।

d) मम मण्डलस्य नाम ………।

3) कण्ठपाठपद्यं लिखत 1*4=4

गुरुर्ब्रह्मा ………………….

…………………………………………………|

…………………………………………………

……………………. नमः।।

4) संयोज्य लिखत 4*1=4

| | | |
|---|---|---|
| a) | गणनाथः | धावति |
| b) | मारुतिः | भक्तिप्रियः |
| c) | नेत्राभ्यां | आञ्जनेयः |
| d) | पादाभ्यां | पश्यामः |

5) वर्णान् विभज्य लिखत 4*1=4

१. रघुनन्दनः = र्+अ+……………………………..।

२. ललाटम् = ……………………………+म्।

३. सुविक्रम =………………………………म्+अ।

४. पितामह = ……………………………..ह्+अः।

~~*~~